19R

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जानेवारी – २०२३**

**सत्र ५ वे**

**विषयः व्याकरण ५ (19R451)**

| | | |
|---|---|---|
| **दिनांक :** ०३/०१ /२०२३ | **गुण : ६०** | **वेळ : स. १०.०० ते १२.३०** |

**सूचना : सर्व प्रश्न अनिवार्य**

**प्र.१. सूचनानुसारं कुरुत । (पञ्चदश प्रश्नान् उत्तरत ।)** **१५**

१. एकं सन्धिविच्छेदं कुरुत – निष्पुत्रस्य, यत्रैतास्तु

२. एकं सन्धिं कुरुत –

१) तत्र +उपायः+अपि+अस्ति

२) द्वात्रिंशत् + लक्षण+उपेतम्

३. एकं समासविग्रहं करुत – द्वियमुनम् , हरिहरौ

४. प्रयोगपरिवर्तनं कुरुत – पक्षिणः जलाशयात् जलं पिबन्ति ।

५. प्रयोगपरिवर्तनं कुरुत –मया सत्यमेव वदिष्यते ।

६. संस्कृतभाषया अङ्कं लिखत –४३

७. सु धातोः परस्मैपदस्य लङ्लकारस्य प्रथमपुरुषस्य रूपाणि लिखत।

८. ग्रह धातोः परस्मैपदस्य लङ्लकारस्य उत्तमपुरुषस्य रूपाणि लिखत।

९. रूपपरिचयं कारयत – हन्ति

१०. रूपपरिचयं कारयत – महिम्ना

११. रिक्तस्थानं पूरयत – स्वस्ति ----- । (ब्राह्मण)

१२. यथा ---- तथा इति शब्दौ योजयित्वा संस्कृतवाक्यं लिखत ।

१३. 'सह' इति अव्ययमुपयुज्य संस्कृतवाक्यं लिखत ।

१४. 'छात्र' इति शब्दस्य संस्कृतपर्यायं लिखत ।

१५. 'सैन्यम्' इति शब्दस्य संस्कृतपर्यायं लिखत ।

१६. 'जगत्' शब्दस्य पञ्चमी विभक्तेः एकवचनं लिखत ।

१७. अरण्यमित्यस्य शब्दस्य अन्यं संस्कृतशब्दं लिखत ।

१८. एकः चौरः चौर्यार्थं राजभवनं प्रविष्टवान् ।
अस्मिन् वाक्ये प्रविष्टवान् इत्यस्य कृते योग्यं तिङन्तरूपं लिखत ।

**प्र. २. अधोनिर्दिष्टेपु द्वौ परिच्छेदौ स्वभाषया अनुवादत ।** **१०**

अ) नागार्जुनो नाम कश्चित् रसायनशास्त्रज्ञःप्रसिद्धः चिकित्सकश्चापि । देशविदेशेषु तस्य कीर्तिः प्रसृता आसीत् । सः प्रयोगशालायाम् अहोरात्रं कार्यं करोति स्म । तेन बहूनां रोगाणामौषधमन्विष्टम् । एकदा नागार्जुनो महाराजमुक्तवान् – ''महाराज,महदिदं कार्यमसमर्थोऽहमेतत्सर्वं कर्तुम् । एकः सहायकः आवश्यकः। '' राजा अङ्गीकृतवान् । राजा तमवदत् ''भवतु अहं व्यवस्थां करिष्यामि । श्वः योग्याः युवकाःआगमिष्यन्ति । परीक्षां कृत्वा योग्यमेकं स्वीकरोतु ''।

ब) घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम्
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णम्
न प्राणान्ते प्रकृतिविकृतिर्जायते सज्जनानाम् ।।१।।
चित्ते प्रसन्ने भुवनं प्रसन्नं
चित्ते विषण्णे भुवनं विषण्णम् ।
अतोऽभिलाषो यदि ते सुखे स्यात्
चित्तप्रसादे प्रथमं यतस्व ।।२।।

क) एकस्मिन् सरोवरे कोऽपि प्रबलो मकरो विष्णुभक्तिपरं कमपि गजेन्द्रं चरणे जग्राह । स गजेन्द्रो भृशं प्रयतमोनोऽपि मरकमुखात्स्वचरणं मोचयितुं न शशाक । अन्ये गजा महता बलेन विकर्षन्तोऽपि मकरमुखात् तं मोचयितुं न समर्था बभूवुः। तदा दुःखार्तः स गजोऽनन्येन मनसा भगवन्तं विष्णुं ध्यात्वा तं शरणं ययौ । सपद्येव करुणापरो भगवान् वासुदेवस्तत्रागत्य तं विकरालं नक्रं हत्वा स्वभक्तं गजेन्द्रं ररक्ष ।

**प्र.३. अधस्तनेषु केषुचित् एकं विषयमधिकृत्य संस्कृतभाषया निबन्धं लिखत ।** **१०**

१. विद्याधनं सर्वधनप्रधानम् ।
२. मम भारतराष्ट्रम् ।
३. वृक्षाः मित्राणि खलु ।

**प्र. ४. चतुर्णां सूत्राणां स्पष्टीकरणं कुरुत ।** **१६**

१. अकथितं च ।
२. सप्तम्यधिकरणे च ।
३. सह सुपा ।
४. अव्ययीभावे चाकाले ।
५. कर्तृकरणे कृता बहुलम् ।
६. नमः स्वस्ति-स्वाहा-स्वधालं-वषड्योगाच्च ।

**प्र. ५. सूत्राण्युद्धृत्य तिस्रः टिप्पणीः लिखत** **०९**

१. सम्प्रदानम्
२. अपादानम्
३. समासः
४. उपसर्जनम्
५. पञ्च वृत्तयः

----------